# संस्कृतवार्ता:

दिनाङ्क : 06.09.25 सायम् - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् सः अमेरिकादेशस्य राष्ट्रपतेः डोणाल्ड् ट्रम्पस्य भावनायाः पूर्णरूपेण सम्मानं करोति तथा च भारत-अमेरिका-देशयोः सम्बन्धानां सकारात्मकमूल्यांकनं गभीरतया प्रशंसित:।
- वित्तमन्त्री निर्मलासीतारमण: प्रोक्तवती यत् भारतदेश: रूसदेशत: तैल-क्रयणं यथावत् स्थास्यति। एतदर्थं राष्ट्रहितानां संरक्षणं भविष्यति।
- उत्तराखण्डे चारधाम-यात्रा पुनराब्धा गंगोत्री-यमुनोत्री तीर्थयात्रा च स्थगिता।
- देशे बहुषु क्षेत्रेषु दश-दिवसात्मिकीय: गणेशोत्सव: अद्य मूर्ति विसर्जन-पुरस्सरं सम्पन्नं सञ्जायते।

-----------------------------------------------

<u>प्रधानमन्त्री-अमेरिका</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् सः अमेरिकादेशस्य राष्ट्रपतेः डोणाल्ड् ट्रम्पस्य भावनायाः पूर्णरूपेण सम्मानं करोति तथा च भारत-अमेरिका-देशयोः सम्बन्धानां सकारात्मकमूल्यांकनं गभीरतया प्रशंसित:। एकस्मिन् सोशल मीडिया सन्देशे प्रधानमन्त्री अवदत् यत् भारत-अमेरिका-सहभागित्वम् अतीव सकारात्मकं, दूरदर्शी च अस्ति इति। सः अवदत् यत् द्वयोः देशयोः मध्ये सम्बन्धः वैश्विकस्तरे व्यापकः सामरिकः च अस्ति इति।

गतरात्रौ वाशिङ्गटन्-नगरे वार्ताहरान् सम्बोधयन् श्रीट्रम्पः अवदत् यत् भारत-अमेरिका-देशयोः मध्ये विशिष्टः सम्बन्धः अस्ति, किमपि चिन्तयितुं नास्ति इति। सः अकथयत् यत् श्रीनरेन्द्रमोदी एकः महान् प्रधानमन्त्री अस्ति, सः सर्वदा तस्य मित्रः भविष्यति इति।इतः पूर्वं ट्रम्पः सोशल मीडिया सन्देशे उक्तवान् यत् अमेरिका-देशः भारतं चीन-देशात् पराजयत इति आकाशववाण्या सह चर्चायां पूर्वराजदूतः अशोक सज्जनहरः अवदत् यत् आगामिषु दिनेषु अमेरिकादेशेन सह भारतस्य सहभागिता इतोपि सुदृढं, जीवन्तं, गतिशीला च भविष्यति।

--------------------------------------------------

## सीतारमण-रशिया-तैलम्

वित्त मन्त्रिणा निर्मला-सीतारमणेन प्रोक्तं यत् भारतदेश: रशिया-देशत: तैल-क्रयणं यथावत् स्थास्यति। एतदर्थं राष्ट्रिय-हितानां रक्षणं संधारयिष्यति। एकया सोशल-मीडिया-वाहिन्या सह सञ्जाते स्वीये साक्षात्कारे वित्तमन्त्रिणा प्रोक्तं यत् भारत-देश: स्वीय-आवश्यकतानां पूर्तये वस्तूनां क्रयणं करिष्यति। वस्तु-सेवाकर-जीएसटी एतस्य नूतनायां व्यवस्थायां वित्त-मन्त्रिणा उक्तं यत् एतस्मात् कारणात् नागरिकाणां उपभोगे परिष्कार: भविष्यति।

--------------------------------------------------

## जयशंकर-मोदी

विदेशमन्त्री डॉ. एस जयशंकरः अद्य अवदत्, यत् प्रधानमन्त्री नरेन्द्रमोदी भारतामेरिका देशयोः मध्ये सहभागित्वं अत्यन्तं महत्त्वं ददाति। अमेरिकीराष्ट्रपतिं डोनाल्ड ट्रम्पं प्रति प्रधानमन्त्रिणः मोदिनः प्रतिक्रियायाः विषये वार्ताहरैः सह वार्तालापं कुर्वन् डॉ. जयशंकरः अवदत् यत्, श्रीमोदिनः राष्ट्रपतिट्रम्पेन सह सर्वदा अतीव उत्तमं निज सम्बन्धः वर्तते। सः अवदत् यत् भारतं अमेरिकादेशेन सह सम्बद्धं वर्तते।

--------------------------------------------------

## वैष्णव-जी. एस. टी. परिष्कारः

सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अकथयत् यत् नेक्स्ट जनरेशन जी. एस्. टी.- परिष्कारैः मध्यमवर्गस्य कुटुम्बेभ्यः महत्त्वपूर्णं बहुमूल्यं च उपहारं प्रधानमन्त्रिणा प्रदत्तम् इति। अद्य नवदिल्ल्यां वार्ताहरान् सम्बोधयन् श्रीवैष्णवः अवदत् यत्, जी. एस्. टी.-इत्यस्य संशोधित संस्करणे राष्ट्रस्य जी. डी. पी. इत्यस्मिन् प्रायः विंशति-लक्षकोटि-रूप्यकाणां वृद्धिः भविष्यति। येन देशस्य अर्थव्यवस्थायां महती वृद्धिः भविष्यति इति।

--------------------------------------------------

जीएसटी-परिष्कार:

प्रशासनेन वस्तु-सेवा-करेषु परिष्कारानन्तरं आगामि-द्वाविंशति-दिनांकत: उपभोक्तृणाम् उपयोगी-वस्तूनां मूल्यं अपचयिष्यति। जीएसटी परिषद: अप्रत्यक्ष कर-प्रणाली प्रत्येकस्मिन् पञ्च, द्वादश, अष्टादश, अष्टाविंशति-प्रतिशतत: चतु:स्तरीय-संरचनात: सरलीकृत्य-पञ्च-अष्टादश-प्रतिशतस्य स्तरे परिवर्तितम्।

--------------------------------------------------

उत्तरखण्डः चारधाम यात्राः

उत्तराखण्ड्-राज्ये ऋतौ परिष्करणेन, मार्गाणां परिष्करणेन च अद्यारभ्य चारधाम-यात्रा, पञ्जीकरणप्रक्रिया च पुनः आरब्धा। अवधेयं अस्ति यत् गङ्गोत्री-यमुनोत्री-तीर्थयात्रां सद्यः एव प्रचण्डवृष्ट्या स्थगितम् आसीत्, येन क्षेत्रस्य मार्गाः क्षतिग्रस्ताः अभवन्, येन तीर्थयात्रिणां कृते यात्रा असुरक्षितम् अभवत्। मार्गाणां पुनः निर्माणानन्तरं एतयोः तीर्थयोः यात्रा पुनः आरभ्यते इति अपेक्ष्यते। आवश्यकतानुगुणं यात्रायाः प्रबन्धनस्य अथवा स्थगनस्य अधिकारः मण्डल-न्यायाधीशं प्रदत्तः अस्ति।

राष्ट्रिय-राजधान्यां यमुना-नद्याः जलस्तरे न्यूनातागता, परञ्च नगरे जलप्लावन सदृशी स्थितिः अधुनापि वर्तते, जलस्तरं सङ्कट-चिह्नात् उपरि एव अस्ति। नवीनतमस्य अद्यतनस्य सूचनानुसारं, ओल्ड्-रेल्-ब्रिड्ज् इत्यस्य जलस्तरः मापिकानुसारं कतिपयदिनेषु प्रथमवारं जलस्तरे न्यूनतागता अस्ति।

--------------------------------------------------

प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्रमोदी परिस्थितिं समीक्षितुं जलाप्लावित-राज्यानां भ्रमणं करिष्यति, अवधेयं यत् जम्मू-कश्मीर्, पञ्जाबादी उत्तरभारतस्य अनेके भागाः अविरामवृष्ट्या, भूस्खलनेन, आकस्मिकजलप्लावनेन च गम्भीरतया प्रभाविताः सन्ति। अत्रान्तरे, हिमाचलप्रदेशे वृष्ट्याः

प्रभावः निरन्तरं अनुभूयते, तत्र अविरामवृष्ट्या, भूस्खलनेन च अनेकेषु स्थानेषु यातायातं प्रभावितम् अस्ति।

-------------------------------------------------

<u>पञ्जाब-जलपूर:</u>

पञ्जाब-राज्ये जलपूर-स्थिति: शनै:शनै: नियन्त्रणाधीना सञ्जायते। ऋतु-विज्ञान-विभागेन आगामि दिनद्वयो: अति-वृष्टे: सम्भावना नैव प्रकटिता अस्ति। भाखड़ा-पोंग-सेतो: जलमोचन-स्थिति: नियन्त्रिता वर्तते। तत्रत्य मण्डलीय अध्यक्षेण प्रतिपादितं यत् बृहन्मात्रिक-जलं साम्प्रतं नैव मोचयिष्यते।

-------------------------------------------------

<u>गणेश-विसर्जनम्</u>

अशेष-देशे बहुषु क्षेत्रेषु दश-दिवसात्मिकीय: गणेशोत्सव: अद्य मूर्ति-विसर्जन-पुरस्सरं सम्पन्नं सञ्जायते। श्रद्धालव: गणेश-चतुर्थ्या: पवित्र दिवसे भगवत: गणेशस्य प्रतिमानां सामूहिक-रूपेण मण्डपेषु स्थापयन्ति, अनन्त-चतुर्दश्या: च दिवसे बप्पाया: भावपूर्णतया विसर्जनं कुर्वन्ति।

-------------------------------------------------

<u>टेनिस्</u>

अमेरिकी-ओपन-टेनिस-टूर्नामेंट-प्रतिस्पर्धायं इटली-देशीय यानिक-सिनर: पुरुष-एकल-स्पर्धाया: निर्णायक-द्वन्द्वे प्रविष्ट:। अपरत्र-महिला-एकल-स्पर्धायां अमेरिकीया अमांडा-अनिसिमोंवा निर्णायक-द्वन्द्वे स्वीय-स्थानं स्तब्धवती। पुरुष-युगलस्य अन्तिमा स्पर्धा अद्य रात्रौ स्पेन-देशस्य मार्शल:, अर्जेंटीनाया:होरासियो च, ब्रिटिश-मुगलयो:स्पर्धिष्येते।

।। इति वार्ता:।।